# माध्यमिकशिक्षापाठ्यक्रमः
# कर्मकाण्डः

**कक्षा : ९ र १०** **विषयसङ्केतः : (कक्षा ९ Kar.273 कक्षा १० Kar.274)**

**पाठ्यघण्टा : ४** **वार्षिककार्यघण्टा : १२८**

## १. परिचयः

अनादिकालात् प्रचलन्ति सांस्कृतिकान्यैमैतिह्यानि च पर्वाणि, परम्परया प्राप्तानि प्रचलनानि, स्थापितानि रीतिस्थितिपद्धत्यादीनि च व्यवस्थिततया सञ्चालयितुं नवम-दशम-कक्षास्तरीय-कर्मकाण्डशिक्षायाः पाठ्यक्रमो निर्धारितः । कर्मकाण्डविषयस्य एतस्मिन् पाठ्यक्रमे श्रावणीस्नान-यज्ञोपवीतनिर्माणाभिमन्त्रण-मातृकापूजा-आभ्युदयिकश्राद्ध-मण्डपनिर्माण-चूडोपनयन-वेदारम्भ-समावर्तन-एकोद्दिष्टश्राद्ध-गृहारम्भ-गृहप्रवेश-व्रतोद्यापनादिविषयाः समाविष्टाः सन्ति । तथैव विवाहपद्धति-चतुरशीतिपूजा-अन्त्यपद्धतिप्रयोग-पार्वणैकपार्वणतीर्थश्राद्धादिविषयाणाञ्च सन्निवेशो विद्यते । पूर्वकक्षासु पठितानां कर्मकाण्डविषयाणां क्रममालोच्य तदनुकूलतया पाठ्यक्रमेऽस्मिन् शास्त्रीयविषया व्यावहारिकरीत्या सन्निविष्टाः । एकादश-द्वादशस्तरीय-कर्मकाण्डविषयाध्ययनाय आधारभूतः कर्मकाण्डीय-पाठ्यक्रमोऽयं सैद्धान्तिकं प्रायोगिकञ्च ज्ञानं प्रदातुं क्षमोऽस्ति । अनेन पाठ्यक्रमेण सम्बद्धविषये उच्चशिक्षाया आधारोऽपि निर्मात्स्यत इति चापेक्षितं वर्तते ।

स्वकीयैः पूर्वजैः निर्दिष्टं संस्कारमार्गमवलम्बितुमेवास्माकं कृते श्रेयस्करो भवत्येव । तेषां नियमानुशासन-सदाचार-आहारविहारादिविषया विचारणीया भवन्ति । **आचारहीनाः न पुनन्ति वेदाः** इत्यादीनि स्मृतिवाक्यानि सदाचरणाय मानवान् प्रेरयन्ति । वैदिकमतानुकूलं कर्मानुष्ठानेनैव जनाः आचारवन्तः सन्तो जीवन्तीत्यत्र न कापि विप्रतिपत्तिः । अस्माकमार्षसंस्कृतेराधारभूमिरूपेण अखिलो वेदः प्रथितः । वेदे कर्मकाण्डज्ञानकाण्डौ पृथक्त्वेनोपदिष्टौ । वेदैस्तदनुकूलैः स्मृतिभिः, पुराणादिभिश्च कर्मकाण्डीयविषयो निर्दिष्टोऽस्ति । अतः वेदोक्तमार्गेण स्वजीवनं सफलीकर्तुं वेदोक्तसंस्कारोऽवलम्बनीयः । नेपालः खलु विविधानां धर्मसंस्कृतिरीतिपद्धतीनां सुन्दरमुद्यानं वर्तते । अत्र सनातनधर्मावलम्बिभिः सह अन्ये सम्प्रदायाः, धर्मावलम्बिनः, संस्कृत्यनुयायिनश्च सहृदयभावेन साहाय्यभावेनावतिष्ठन्ति । अतोऽस्माकं राष्ट्रियैकता, अखण्डता च संरक्षिता इति सुविदितमेव । नामकरणादयः संस्काराः, पर्वाणि, जात्राख्या परम्परा च अस्माकमस्तित्वमवबोधकाः । अत्र सनातनसंस्कृत्यनुयायिनः, बौद्धाः, शिखपरम्पराप्राप्ताः, जैनावलम्बिनः, शाक्तवैष्णवशैवाश्च सर्वेऽपि जन्मसंस्कारादारभ्य मृत्युसंस्कारं यावन्नैकविधान् संस्कारान् समनुतिष्ठन्ति । सनातनसंस्कृतौ वेदविहिता नैकविधाः संस्काराः सन्ति । वेदविहितेषु कर्मसु कतिपयकर्माणि सम्यक्तया सम्पादितानि न सन्तीति खेदस्य विषयः । राष्ट्रस्यास्तित्वरक्षायै तत्रस्थाः संस्कृतिपरम्परापद्धतय एव प्रभवन्ते । अतो वैदिकधर्मसंस्कृतेः संरक्षणार्थं माध्यमिकशिक्षायामेव संस्कृतवाङ्मयेन सह कर्मकाण्डविषयस्याऽध्ययनाऽध्यापनं नूनमावश्यकमिति मत्वा पाठ्यक्रमोऽसौ विकासं नीतोऽस्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यञ्च, कार्यतत्परतां संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनो क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. विषयानुगताः क्षमताः

**ऐच्छिककर्मकाण्डविषयमवलम्ब्य माध्यमिकस्तरस्याध्ययनानन्तरं छात्रा अधोनिर्दिष्टविषयेषु सक्षमाः भविष्यन्ति-**

१. निर्धारितवैदिकसंस्काराणां महत्त्वं विज्ञाय सम्यक् प्रतिपादने
२. तर्पणसहितमेकोद्दिष्टविधिं पार्वणश्राद्धविधिञ्च शुद्धतया सम्पादने

३. विवाहपद्धतिं ज्ञात्वा विधिपूर्वकं सम्पादने
४. निर्धारितविधिमनुसृत्य प्रसिद्धानां देवदेवीनां पूजासम्पादने
५. प्रसिद्धानां व्रतानाम् उद्यापनं तथा चतुरशीतिपुजनपद्धतिं विज्ञाय तदनुरूपं कार्यं सम्पादयितुम्
६. ज्योतिषशास्त्रे निर्धारितं कर्मकाण्डीयं लग्नमुहुर्तादिविषयं विज्ञाय व्यवहारे प्रयोक्तुम्
७. पञ्चकनक्षत्रं एवं मासिकादिकं विचार्य कार्यं सम्पादयितुम्
८. अन्त्यपद्धतिगत-एकादशाह-द्वादशाहकृत्यानि बोधयित्वा सम्यक् प्रतिपादयितुम्
९. विविधकर्मसम्बद्धाः रङ्गवल्लीः रचयितुम्
१०. विविधकर्मगतान् हस्तसञ्चालनप्रक्रियां बोधयित्वा प्रयोगपुरःसरं व्यवहारे प्रयोक्तुम्
११. प्रकरणगतानि नित्य-नैमित्तिक-काम्यकर्माणि विज्ञाय सम्यक् सम्पादयितुम्

## ३. कक्षागतशिक्षणोपलब्धयः

### कक्षा ९

**माध्यमिकस्तरीयायां ९ कक्षायां कर्मकाण्डविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति :**

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. श्रावणीस्नानविधेर्मन्त्राणां, श्लोकानां विधिवाक्यानाञ्च पठनलेखनादिकं कृत्वा तदनुरूपं कार्यं सम्पादयितुम् | १.१. श्रावणीस्नानविधेर्मन्त्रान् श्लोकान् विधिवाक्यानि च सावधानेन श्रोतुमुच्चारयितुं लेखितुञ्च<br>१.२. सम्बद्धानि विधिवाक्यानि निर्दिष्टकर्मणि प्रयोक्तुम्<br>१.३. निर्दिष्टकर्मणः पद्धतिं कथयितुं लेखितुञ्च<br>१.४. यथाविधि निर्दिष्टं कर्म सम्पादयितुम् |
| २. यज्ञोपवीतस्य निर्माणाभिमन्त्रण-धारणकर्मणां स्वरूपाणि, मन्त्रान्, श्लोकान्, विधिवाक्यानि च विज्ञाय सम्यक् भाषितुं, लेखितुं, प्रकाशयितुं व्यवहारे प्रयोक्तुञ्च । | २.१. निर्दिष्टकर्मणो विधिस्वरूपं कथयितुम्, लेखितुञ्च<br>२.२. पठितानां कर्मणां स्वरूपभेदं वक्तुम्, प्रकाशयितुञ्च<br>२.३. सप्तर्षीणां नामानि कथयितुं लेखितुञ्च<br>२.४. निर्दिष्टकर्मणि सम्यक्तया सम्बद्धान् मन्त्रान् प्रयोक्तुम्<br>२.५. निर्दिष्टकर्मणो प्रयोगं भाषितुं, लेखितुं, सम्पादयितुञ्च |
| ३. मातृकापूजनविधिम्, आभ्युदयिकश्राद्धविधिम्, एकोद्दिष्टश्राद्धविधिम्, मण्डपनिर्माणविधिञ्च विज्ञाय सम्यक् लेखितुं प्रतिपादयितुञ्च | ३.१. मातृकाणाां नामानि कथयितुं लेखितुञ्च<br>३.२. निर्दिष्टश्राद्धविधिवाक्यानि सशुद्धिरुच्चारयितुं लेखितुञ्च<br>३.३. सम्बद्धकर्मणां स्वरूपभेदं वक्तुं, लेखितुञ्च<br>३.४. मण्डपनिर्माणप्रकारं वक्तुं लेखितुञ्च<br>३.५. यथाविधि मण्डपं निर्मातुम्<br>३.६. निर्दिष्टपूजापद्धतेः स्वरूपं विज्ञाय कथयितुम् |
| ४. चूडोपनयनवेदारम्भसमावर्तन-संस्काराणां स्वरूपं विज्ञाय सम्बद्धानां मन्त्रश्लोकविधिवाक्यादीनां पठनलेखनादिकं कृत्वा तदनुरूपं कार्यं सम्पादयितुम् | ४.१. निर्दिष्टकर्मणां स्वरूपं कथयितुं प्रकटयितुञ्च<br>४.२. निर्दिष्टकर्मगतानि सङ्कल्पवाक्यानि विधिवाक्यानि च साधूच्चारयितुं लेखितुञ्च<br>४.३. सम्बद्धकर्मणो मन्त्रान्, श्लोकाँश्च वक्तुं लेखितुं प्रयोक्तुञ्च<br>४.४. सविधि चूडोपनयनादिसंस्कारान् सम्पादयितुम् |

| | |
|---|---|
| ५. गृहारम्भ-गृहप्रवेशकर्मणोः व्रतोद्यापनविधीनाञ्च मन्त्रश्लोकविधिवाक्यादीनि विज्ञाय सम्यक् प्रकटयितुम् | ५.१. निर्दिष्टकर्मणां मुहूर्तं विज्ञाय कथयितुं लेखितुञ्च<br>५.२. व्रतोद्यापनविधेर्मन्त्रान् श्लोकान् विधिवाक्यानि च सम्यक् भाषितुं लेखितुञ्च<br>५.३. गृहारम्भगृहप्रवेशकर्मणोः स्वरूपं वक्तुं, प्रकाशयितुञ्च<br>५.४. विविधानां व्रतोद्यापनविधीनां स्वरूपभेदं प्रकटयितुम्<br>५.५. सम्बद्धकर्मगतानि सङ्कल्पवाक्यानि शुद्धतयोच्चारयितुं लेखितुञ्च |

## कक्षा १०

**माध्यमिकस्तरीयायां १० कक्षायां कर्मकाण्डविषयमधीत्य छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति :**

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. विवाहकर्मणः पद्धतिं, मन्त्रान्, श्लोकान् विधिवाक्यानि, सङ्कल्पवाक्यानि च विज्ञाय पठनलेखनादिकं कृत्वा तदनुरूपं कार्यं सम्पादयितुम् | १.१. विवाहकर्मणो मन्त्रान्, श्लोकान्, विधिवाक्यानि, सङ्कल्पवाक्यानि च सावधानेन श्रोतुमुच्चारयितुं लेखितुञ्च<br>१.२. विवाहानन्तरं विधेयस्य चतुर्थीकर्मणो मन्त्रश्लोकविधिवाक्यादीनि पठितुं लेखितुञ्च<br>१.३. निर्दिष्टकर्मणि सम्बद्धान् मन्त्रान् सम्यक्तया प्रयोक्तुम्<br>१.४. निर्दिष्टकर्मणः पद्धतिं वक्तुं, लेखितुञ्च<br>१.५. विधिमनतिक्रमय विवाहविधिं चतुर्थीकर्म च सम्पादयितुम् |
| २. चतुरशीतिपूजाविधिं पठित्वा व्यवहारे प्रयोक्तुम् । | २.१. चतुरशीतिपूजाविधेः स्वरूपं कथयितुं प्रकटयितुञ्च<br>२.२. निर्दिष्टकर्मणो मन्त्रान्, श्लोकान्, विधिवाक्यानि, सङ्कल्पवाक्यानि च सावधानेन श्रोतुमुच्चारयितुं लेखितुञ्च<br>२.३. निर्दिष्टकर्मणः पद्धतिं वक्तुं, लेखितुञ्च<br>२.४. निर्दिष्टकर्मणि सम्बद्धान् मन्त्रान् सम्यक्तया प्रयोक्तुम्<br>२.५. चतुरशीतिसिद्धानां नामानि वक्तुं लेखितुञ्च<br>२.६. सर्वतोभद्रचक्रं निर्माय तत्रस्थान् देवतान् पूजयितुम्<br>२.७. विधिमनतिक्रमय चतुरशीतिपूजाविधिं सम्पादयितुम् |
| ३. मृताहादेकादशाहे द्वादशाहे च विधेयानां कर्मणाम्, पञ्चकमरणविधेः, मासिकश्राद्धविधेः, अस्थिक्षेपविधेश्च मन्त्रश्लोकविधिवाक्यादीनि पठित्वा लेखितुं सम्यक् प्रयोक्तुञ्च | ३.१. निर्दिष्टकर्मणां मन्त्रान्, श्लोकान्, विधिवाक्यानि, सङ्कल्पवाक्यानि च साधूच्चारयितुं लेखितुञ्च<br>३.२. मृताहादेकादशाहे द्वादशाहे च विधेयामितिकर्तव्यतां वक्तुं लेखितुञ्च<br>३.३. निर्दिष्टकर्मणां पद्धतिं वक्तुं, लेखितुञ्च<br>३.४. निर्दिष्टकर्मसु सम्बद्धान् मन्त्रान् सम्यक्तया प्रयोक्तुम्<br>३.५. निर्दिष्टकर्मणां सङ्कल्पवाक्यानि संयोजयितुम्<br>३.६. सविधि निर्दिष्टान् कर्मणः सम्पादयितुम् |
| ४. श्राद्धाङ्गभूतस्य तर्पणविधेः पार्वणैकपार्वणतीर्थसंज्ञकश्राद्धानाञ्च बोधपुरःसरं प्रकटयितुं सम्यक् | ४.१. श्राद्धाङ्गभूतस्य तर्पणविधेर्निर्दिष्टानां श्राद्धानाञ्च मन्त्रश्लोकविधिवाक्यादीनि श्रोतुं वक्तुं प्रकटयितुञ्च |

| | |
|---|---|
| प्रतिपादयितुञ्च | ४.२. निर्दिष्टश्राद्धानां सङ्कल्पवाक्यानि सशुद्धिरुच्चारयितुं लेखितुं संयोजयितुञ्च<br>४.३. सम्बद्धकर्मणां स्वरूपभेदं वक्तुं, लेखितुञ्च<br>४.४. तर्पणगतवाक्यानि शुद्धतयोच्चारयितुं लेखितुञ्च<br>४.५. निर्दिष्टकर्मणां पद्धतिं वक्तुं, लेखितुञ्च<br>४.६. निर्दिष्टकर्मसु सम्बद्धान् मन्त्रान् सम्यक्तया प्रयोक्तुम्<br>४.७. विधिमनतिक्रमय निर्दिष्टान् कर्मणः सम्पादयितुम् |

## ४. विषयवस्तुनः क्षेत्रक्रमौ

### कक्षा ९

| क्र.सं. | प्रकरणम् | बोधः | अभिव्यक्तिः | कार्यघण्टाः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| १. | श्रावणीस्नानम् | • श्रावणीस्नानविधिबोधः<br>• श्रावणीस्नानसम्बद्धानां मन्त्राणां श्लोकानाञ्च पठनबोधः | • श्रावणीस्नानविधेः प्रयोगप्रदर्शनम्<br>• श्रावणीस्नानगतसम्भाराणां प्रयोगदर्शनम्<br>• श्रावणीस्नानविधेः प्रकटनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | ९ | ७ |
| २. | यज्ञोपवीतस्य निर्माणाभिमन्त्रणधारणानि | • यज्ञोपवीतमहोवबोधः<br>• यज्ञोपवीतनिर्माणविधिबोधः<br>• यज्ञोपवीतधारणस्यावश्यकताबोधः<br>• दीपकलशगणेशपूजनविधिबोधः<br>• ऋषिपूजनविधिबोधः<br>• तन्तुदेवतादीनां पठनबोधः<br>• मण्डपस्थ-अङ्गकर्मणां पठनबोधः<br>• यज्ञोपवीतधारणविधिबोधः<br>• सम्बद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • यज्ञोपवीतस्य आदर्शनिर्माणम्<br>• यज्ञोपवीतनिर्माणस्य प्रयोगप्रदर्शनम्<br>• यज्ञोपवीताभिमन्त्रणविधेः प्रकटनम्<br>• ऋषिपूजनविधेः प्रयोगप्रदर्शनम्<br>• यज्ञोपवीतधारणविधेः प्रकाशनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• सङ्कल्पवाक्यानां कर्मानुरूपं संयोजनम्<br>• प्रकरणसम्बद्धानां पद्यानाम् आदर्शपठनम्, प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | ९ | ७ |
| ३. | मातृकापूजा आभ्युदयिकश्राद्धञ्च | • मातृकापूजाविधिबोधः<br>• आभ्युदयिकश्राद्धविधिबोधः<br>• सम्बद्धकर्मगतानां मन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • मातृकापूजाविधेः प्रकटनम्<br>• आभ्युदयिकश्राद्धस्य प्रयोगप्रदर्शनम्<br>• मन्त्राणां परम्परानुरूपं शुद्धोच्चारणम्<br>• प्रकरणसम्बद्धानां पद्यानाम् आदर्शपठनम्<br>• सङ्कल्पवाक्यानां कर्मानुरूपं | ८ | ६ |

| | | | | | |
|---|---|---|---|---|---|
| | | | रूपान्तरणम्<br>• सम्बद्धप्रश्नानाम् उत्तरलेखनञ्च | | |
| ४. | मण्डपनिर्माणम् | • मण्डपनिर्माणविधिबोधः<br>• मण्डपपूजाकर्मणः पठनबोधः<br>• मण्डपस्थ-अङ्गकर्मणां पठनबोधः<br>• दशदिक्पालपूजनमन्त्राणां पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • मण्डपपूजाविधेः प्रकटनम्<br>• कर्मगतमन्त्राणां गुरूमुखानुरूपं सस्वरमुच्चारणम्<br>• दिक्पालपूजनकर्मणः प्रयोगप्रकटनम्<br>• रङ्गरञ्जितमण्डपस्य निर्माणद्वारा प्रयोगप्रदर्शनम् | ६ | ५ |
| ५. | चूडोपनयनवेदारम्भ-समावर्तनानि | • जूटिकाबन्धनकर्मणः प्रयोगबोधः<br>• चूडाकर्मणः विधिबोधः<br>• केशच्छेदनविधिबोधः<br>• उपनयनकर्मणः विधिबोधः<br>• वेदारम्भविधेर्बोधः<br>• उपनयनकर्मगत-अङ्गकर्मणां प्रयोगबोधः<br>• समावर्तनकर्मणः विधिबोधः<br>• समावर्तनकर्मसम्बद्ध-अङ्गकर्मणां प्रयोगबोधः<br>• सम्बद्धकर्मगतानां मन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • जूटिकाकर्मणः प्रयोगप्रकटनम्<br>• चूडाकर्मविधेः प्रकाशनम्<br>• उपनयनकर्मणः प्रयोगप्रदर्शनम्<br>• गुरोरभिवादनप्रयोगस्य स्वरूपप्रदर्शनम्<br>• वेदारम्भकर्मणः प्रयोगप्रदर्शनम्<br>• सावित्रीप्रदानकर्मणः प्रयोगनिदर्शनम्<br>• उपनयनकर्मगत-शेषकर्मणां प्रयोगप्रदर्शनम्<br>• समावर्तनकर्मणः प्रयोगप्रदर्शनम्<br>• समावर्तनकर्मगतहवनकर्मणः विधिप्रकटनम्<br>• समावर्तनकर्मगत-अङ्गकर्मणां स्वरूपनिदर्शनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | २५ | २० |
| ६. | एकोद्दिष्टश्राद्धम् | • श्राद्धाङ्गभूतस्य तर्पणविधेर्बोधः<br>• एकोद्दिष्टश्राद्धगतविधिबोधः<br>• एकोद्दिष्टश्राद्धकर्मणः प्रयोगबोधः<br>• श्राद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • श्राद्धाङ्गभूतस्य तर्पणविधेः प्रकटनम्<br>• एकोद्दिष्टश्राद्धविधेः प्रयोगप्रदर्शनम्<br>• प्रकरणसम्बद्धकर्मणः आदर्शपठनम्<br>• प्रकरणसम्बद्धपद्यानाम् आदर्शवाचनम्<br>• मन्त्राणां परम्परानुरूपं शुद्धोच्चारणम्<br>• सङ्कल्पवाक्यानां कर्मानुरूपं रूपान्तरणम् | १३ | १० |
| ७. | गृहारम्भः, गृहप्रवेशश्च | • खातारम्भस्य विधिबोधः<br>• शिलान्यासकर्मणः विधिबोधः<br>• गृहप्रवेशकर्मणः प्रयोगबोधः<br>• सम्बद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • खातारम्भविधेः प्रयोगनिदर्शनम्<br>• शिलान्यासकर्मणः स्वरूपप्रकटनम्<br>• गृहप्रवेशकर्मणः प्रयोगविधिप्रदर्शनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | ६ | ५ |

| | | | | | |
|---|---|---|---|---|---|
| ८. | व्रतोद्यापनानि<br>(एकादशी-रामनवमी-हरितालिका-ऋषिपञ्चमी-अनन्तचतुर्दशी-पौषार्क-पौर्णमासी-कृष्णाष्टमी-स्वस्थानी-शिवरात्रि-सोमवत्यमावास्या-प्रदोषाख्यानां व्रतानामुद्यापनविधिः) | • मण्डपपूजाविधेरवबोधः<br>• सर्वतोभद्रचक्रनिर्माणप्रकारबोधः<br>• सर्वतोभद्रमण्डलस्थदेवतानां पूजनप्रकारबोधः<br>• व्रतोद्यापनप्रकरणे निर्धारितकर्मणां विधिबोधः, प्रयोगबोधश्च<br>• सम्बद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • मण्डपपूजाविधेः प्रकटनम्<br>• सर्वतोभद्रचक्रस्य निर्माणम्<br>• सर्वतोभद्रमण्डलस्थदेवतानां पूजनम्<br>• व्रतोद्यापनप्रकरणगतकर्मणां विधिप्रकटनम्<br>• प्रकरणसम्बद्धकर्मणः आदर्शपठनम्<br>• प्रकरणसम्बद्धपद्यानाम् आदर्शवाचनम्<br>• मन्त्राणां परम्परानुरूपं शुद्धोच्चारणम्<br>• सङ्कल्पवाक्यानां कर्मानुरूपं रूपान्तरणम् | २० | १५ |
| **सैद्धान्तिकाभ्यासः** | | | | **९६** | **७५** |
| **प्रयोगाभ्यासः** | | | | **३२** | **२५** |
| **योगः** | | | | **१२८** | **१००** |

## कक्षा १०

| क्र.सं | प्रकरणम् | बोधः | अभिव्यक्तिः | कार्यघण्टाः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| १. | विवाहपद्धतिः | • विवाहकर्मणः विधिबोधः<br>• विवाहाङ्गभूतस्य चतुर्थीकर्मणः बोधः<br>• विवाहकर्मगत-अङ्गकर्मणां प्रयोगबोधः<br>• सम्बद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • विवाहकर्मणः प्रयोगप्रदर्शनम्<br>• विवाहाङ्गभूतस्य चतुर्थीकर्मणः प्रयोगनिदर्शनम्<br>• कन्यादानकर्मणः प्रयोगप्रदर्शनम्<br>• लाजाहवनकर्मणः प्रयोगनिदर्शनम्<br>• विवाहकर्मगत-शेषकर्मणां प्रयोगप्रदर्शनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | २८ | २२ |
| २. | चतुरशीतिपूजाविधिः | • चतुरशीतिकर्मणः विधिबोधः<br>• चतुरशीतिकर्मगत-अङ्गकर्मणां प्रयोगबोधः<br>• सम्बद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः<br>• सम्बद्धकर्मणः प्रयोगस्थल-दर्शनबोधः | • चतुरशीतिकर्मणः प्रयोगप्रकटनम्<br>• चतुरशीतिकर्मगत-शेषकर्मणां स्वरूपप्रदर्शनम्<br>• कर्मगतमन्त्राणां गुरुमुखानुरूपं सस्वरमुच्चारणम्<br>• प्रश्नोद्भावनपुरःसरम् उत्तरलेखनञ्च | ९ | ७ |
| ३. | अन्त्यपद्धतिप्रयोग-विधिः<br>(मृताहादेकादशाहे द्वादशाहे च विधेयानि कर्माणि, पञ्चकमरणविधिः, मासिकश्राद्धविधिः, अस्थिक्षेपविधिश्च) | • सम्बद्धकर्मणः पठनबोधः<br>• अन्त्येष्टिकर्मणः प्रयोगबोधः<br>• श्लोकानां लयात्मकरूपेण पठनबोधः | • प्रयोगदर्शनपूर्वकं सम्बद्धविधेः प्रकटनम्<br>• विधिसम्बद्धभागस्य प्रश्नानुसारेण उत्तरलेखनम्<br>• गद्यभागानां आदर्शपठनम्<br>• मन्त्राणां गुरूमुखानुरूपं सस्वरमुच्चारणम् | ३९ | ३० |

| | | | | | |
|---|---|---|---|---|---|
| ४. | पार्वणैकपार्वणतीर्थ श्राद्धानि | • श्राद्धाङ्गभूतस्य तर्पणविधेर्बोधः<br>• श्राद्धगतविधिबोधः<br>• पार्वणश्राद्धकर्मणः प्रयोगबोधः<br>• एकपार्वणश्राद्धकर्मणः प्रयोगबोधः<br>• तीर्थश्राद्धकर्मणः प्रयोगबोधः<br>• श्राद्धकर्मगतमन्त्राणां श्लोकानाञ्च पठनबोधः | • श्राद्धाङ्गभूतस्य तर्पणविधेः प्रकटनम्<br>• पार्वणश्राद्धविधेः प्रयोगप्रदर्शनम्<br>• एकपार्वणश्राद्धविधेः प्रयोगप्रदर्शनम्<br>• तीर्थश्राद्धविधेः प्रयोगनिदर्शनम्<br>• प्रकरणसम्बद्धकर्मणः आदर्शपठनम्<br>• प्रकरणसम्बद्धपद्यानाम् आदर्शवाचनम्<br>• मन्त्राणां परम्परानुरूपं शुद्धोच्चारणम्<br>• गद्यभागानां सङ्कल्पादीनां पठनम्<br>• सङ्कल्पवाक्यानां कर्मानुरूपं रूपान्तरणम् | २० | १६ |
| **सैद्धान्तिकाभ्यासः** | | | | **९६** | **७५** |
| **प्रयोगाभ्यासः** | | | | **३२** | **२५** |
| **योगः** | | | | **१२८** | **१००** |

## ५. प्रयोगात्मककार्यं परियोजनाकार्यञ्च

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरूपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| क.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | कार्यघण्टा | मूल्याङ्कनाधाराः |
|---|---|---|---|---|
| १. | कक्षाकार्यं परियोजनाकार्यं वा | मन्त्रोच्चारणात्मकम्, कुशनिर्माणात्मकम्, रङ्गवल्लीरचनात्मकम्, प्रतिवेदनलेखनात्मकम् | ८ | ➢ कर्मकाण्डसम्बद्धविषयाणां मौखिकी प्रस्तुतिः ।<br>➢ कर्मणां शुष्कप्रयोगप्रदर्शनम् ।<br>➢ रङ्गरञ्जितमण्डलनिर्माणपुरःसरं प्रदर्शनं च ।<br>➢ कुश-काष्ठ-सूत्रादिभिः प्रयोगपरकवस्तुनिर्माणं प्रदर्शनं च ।<br>➢ सम्पादितानां कार्याणां प्रतिवेदनानामभिलेखस्य संरक्षणञ्च |
| २. | विषयवस्तुगतं मूल्याङ्कनम् | (क) अभ्यासात्मकम्, प्रतिवेदनलेखनात्मकम् | १२ | ➢ निर्धारितविषयाणां प्रयोगानुशीलनम् ।<br>➢ सम्बद्धमन्त्राणां प्रयोगस्थलानुसन्धानम् ।<br>➢ कर्मसम्बद्धसङ्कल्पवाक्यानां समुचितप्रयोगानुशीलनम् ।<br>➢ निर्धारित-कर्मकाण्डीयविषयवस्तुबोधः । |
| | | (ख) हस्तक्रियात्मकम्, वर्णनात्मकम्, प्रयोगात्मकम् | १२ | ➢ निर्धारितविषयाणां हस्तक्रियया प्रकाशनम् ।<br>➢ निर्धारितकर्मकाण्डविषयाणां परिचयप्रदानपुरःसरं औचित्याभिव्यञ्जनम् ।<br>➢ निर्धारितकर्मकाण्डप्रयोगेषु कर्मगत-पार्थक्यविवेचनम् ।<br>➢ निर्धारितमुहूर्तानां व्याख्यानं व्यवहारे उपयोगश्च ।<br>➢ आचाराणां महत्त्वकथनम्/व्यावहारिकप्रयोगश्च । |
| योगः | | | ३२ | |

## ६. शिक्षणसञ्चालनप्रक्रिया

कर्मकाण्डीयकौशलविकासाय प्रयोगक्षेत्रस्य पठनस्य च सन्तोलनेन विद्यार्थिनां वैयक्तिकक्षमतायाः सम्बोधनार्हाः कार्यकलापा आवश्यका भवन्ति । सायं प्रातः क्रियमाणैः नित्यनैमित्तिककाम्यकर्मभिस्तथा विद्यालयेषु जायमानेन कर्मकाण्डीयक्रियाकलापेन विद्यार्थिनां शिल्पसामर्थ्यं विस्तृतं भवति, अतः शिक्षणसामग्रीणां कार्यकलापानाधृत्य तदतिरिक्ताननेकान् कार्यकलापान् कारयित्वा शिक्षकेण विद्यार्थिनां नित्यनैमित्तिककाम्यकर्मसम्पादनकौशलस्या-

भिवृद्धयेऽभ्यासो विधेयः । तदर्थं नित्यनैमित्तिककाम्यकर्मसम्पादनकौशलस्य सैद्धान्तिकाभिव्यक्तेश्च शिक्षणं क्रियते । शिक्षणसहजीकरणप्रक्रिया व्यक्तिगताभ्यासाधारिता सामूहिकाभ्यासाधारिता चेति द्विविधा अस्ति । शिक्षणसहजीकरणप्रक्रिया शिक्षणसहकारिणी, सान्दर्भिकी, विद्यार्थिकेन्द्रिता चावश्यकी भवति । पर्याप्तशिक्षणावसरं विद्यार्थिभ्यः प्रदाय पृष्ठपोषणं कुर्वता शिक्षकेण शिक्षणे सहजीकरणं कार्यम् ।

विद्यार्थिनामवस्था, ग्रहणसामर्थ्यं, ग्रहणगतिं चावधार्य निर्धारितकर्मकाण्डीयप्रयोगाभ्यासस्य सहजतायै शिक्षकेण समयसान्दर्भिकविधीनामेव उपयोगो विधेयः । स्वकीयं शिक्षणकौशलं प्रदर्शयितुं विद्यार्थिष्वपेक्षितानि शिल्पानि विकासयितुं पाठ्यक्रमस्योचितं कार्यान्वयनं विधातुञ्च शिक्षकाः शिक्षणसहजीकरणस्याधो निर्दिष्टाः प्रक्रियाः अवलम्बितुं शक्नुवन्ति ।

**(क) उदाहरणं प्रयोगश्च**

कर्मकाण्डशिक्षणे प्रायोगिकपक्षस्य सैद्धान्तिकपक्षस्य अभिव्यक्तिप्रक्रियायाश्च शिक्षणार्थं पाठ्यवस्तूनामुदाहरणेन शिक्षकेण अनेकेषां प्रयोगाणामभ्यासो विधेयः । प्रामाणिकप्रयोगमाधृत्य प्रस्तुतीकरणम्, सहाभ्यासः, रङ्गवल्यादीनां कुशकाशादिवस्तूनाञ्च निर्माणम्, कर्मकाण्डीयव्यावहारिकपक्षस्य प्रयोगप्रदर्शनम्, मन्त्राणां सस्वरवाचनमित्यादयोऽनेके विधयोऽत्रावलम्बितुं शक्यन्ते ।

**(ख) भाषिकसम्प्रेषणस्य प्रकार्यस्य चोपयोगः**

कुशकाशादीनां, जलपात्रादीनां, पूजासामग्रीणाम्, पद्मादिआसनानाम्, यज्ञपात्रादीनाम्, नवग्रहवस्तूनाम्, कस्यापि पूजनकर्मणः वर्णनादिषु अस्य विधेरूपयोगं कर्तुं शक्यते । अस्मिन् विधौ पाठगतसन्दर्भम्, पूजाप्रयोगसन्दर्भम्, स्वानुभूतिञ्चाधृत्य विद्यार्थिनां प्रत्यक्षसहभागितया भाषिककार्यकलापः सञ्चालनीयः । एतदर्थं छात्राणां कृते शिक्षकस्य पूर्ण आंशिको वा सहयोग आवश्यको भवति । शिक्षकेण छात्रेभ्यः सहपाठिशिक्षणस्य वैयक्तिकशिक्षणस्य चावसरः प्रदेयः ।

**(ग) प्रदर्शनात्मकं शिक्षणम्**

अस्यां शिक्षणसहजीकरणप्रक्रियायां विषयवस्तुसम्बद्धानां चित्राणां श्रव्यदृश्यसामग्रीणां च प्रदर्शनं कर्तव्यम् । अत्र विद्यार्थिन मन्त्रोच्चारणशैल्या अनुकरणेन विविधसन्दर्भपरिवेशाधारे विचारप्रस्तुत्या च नित्यनैमित्तिककाम्यकर्माभ्यासं कुर्वन्ति ।

**(घ) प्रश्नोत्तरप्रक्रिया**

अस्यां प्रक्रियायां कमपि विषयमालम्ब्य केचित् प्रश्नं कुर्वन्ति चेत् केचिदस्योत्तरं कथयन्ति । अत्र श्रव्यदृश्यसामग्रीणां प्रयोगो विधातुं शक्यते । अत्र परस्परं वार्तालापो भवति । अस्य विधेरूपयोगः श्रवणभाषणशिल्पयोरूपयोगो भवति । अत्र प्रयोगाणां, पात्रस्वरूपाणां, द्रव्याणां, पूजनसामग्रीणां च निदर्शनप्रदर्शनेन प्रश्ननिर्माणं क्रियते, तदनु तस्य प्रश्नस्योत्तरमपेक्षते । अत्र सहाभ्यास अपेक्ष्यते । अन्ते वैयक्तिकधारणानां सामूहिकधारणानां वा प्रदर्शनं निष्कर्षणं चेत्यादयो भाषिककार्यकलापा विधीयन्ते ।

**(ङ) अभिनयः (कर्मणां शुष्कप्रयोगः)**

अस्यां प्रक्रियायां शुष्कप्रयोगस्यावस्थां निर्माय तदनुरूपक्रियाकलापेन च शिक्षणशिल्पविकासो विधीयते । सामूहिकप्रस्तुत्या वैयक्तिकप्रस्तुत्या परामर्शेण मूल्याङ्कनेन पृष्ठपोषणेन च विद्यार्थिनां प्रयोगशिल्पं भाषिकशिल्पञ्चाभिवर्द्धितुं प्रक्रियैषा उपयोगिनी भवति ।

**(च) स्वाध्यायः परामर्शश्च**

अस्यां प्रक्रियायां विधिबोधकवाक्यानां, श्लोकानां, मन्त्राणाञ्च अध्ययनं धारणानिर्माणं सन्दर्भोपयोगश्चेत्यादयो भाषिककार्यकलापा विधीयन्ते । आदौ गुरुमुखानुरूपमुच्चारणं, युगलपठनं समूहपठनं वा विधाय सामूहिकः परामर्शः कार्यः । अस्मिन् क्रमे विधिकथनं, मन्त्रोच्चारणं, श्लोकश्रवणं तथोच्चारणं, पुनःकथनं, कर्मकाण्डीयप्रयोगाभ्यासश्चेत्यादयो कार्यकलापाः प्रयुज्यन्ते ।

**(छ) अन्वेषणपरियोजने**

अत्र नित्यनैमित्तिककाम्यकर्मप्रयोगक्रमेऽनुभूतानां समस्यानामन्वेषणं विधीयते । निर्देशनेन स्वतो वा विद्यार्थिनोऽत्र समस्या अन्वेषयन्ति । परामर्शः, प्रयोगस्थलावलोकनं पृष्ठपोषणञ्चेत्यादयः कार्यकलापा अत्र प्रयुज्यन्ते । समस्यानां प्रदर्शनेन साकमत्र समाधानोपायाः प्रदर्श्यन्ते ।

(ज) **श्रव्यवाच्याधारे शिक्षणसहजीकरणम्**

अस्यां प्रक्रियायामेकाकिना युग्मेन समूहेन बृहत्समूहेन वा श्रवणं, परामर्शः, निदर्शनप्रदर्शनमनुकरणं, तुलना, विश्लेषणं, मूल्याङ्कनं, निष्कर्षश्चेत्यादीनां मौखिकप्रस्तुतिः क्रियते ।

(झ) **छात्रेषु पठनोत्सुकताप्रवर्धनम्**

शिक्षकेण कक्षारम्भे सम्बद्धपाठ्यवस्तुसम्बन्धिनः पूर्वज्ञानस्य स्वजीवने तस्य व्यावहारिकप्रयोगस्य चाभिव्यक्तेश्च विद्यार्थिभ्यो यथेष्टावसरः प्रदातव्यः । कक्षायां सम्बद्धपौराणिकी कथा, वार्ता, यज्ञीयपात्रप्रदर्शनं, प्रयोगस्थलप्रदर्शनं, कुशादीनां वस्तुनिर्माणादिभिः ध्यानाकर्षककार्यकलापैश्छात्रान् अध्ययनाय सज्जान् समुत्सुकान् च कारयित्वैव पाठारम्भः कार्यः । शिक्षणक्रमेऽनुभवकथन-प्रश्नोत्तर-विमर्शनादिमाध्यमेन पाठ्यवस्तुषु छात्राणां रुचिः प्रवर्द्धनीया ।

(ञ) **कक्षाव्यवस्थापनम्**

कक्षाप्रकोष्ठस्य वातावरणं शिक्षणमैत्रि निर्मातव्यम् । एतस्य कृते शिक्षकस्य विद्यालयस्य च महती भूमिका भवति । कक्षाप्रकोष्ठस्य विद्यालयक्षेत्रस्य च पठनानुकूला भौतिकी सज्जता पाठेषु छात्राणां रुचिवर्धने बहूपयोगिनी भवति । अतो रङ्गवल्यादीनां चित्राणि, यज्ञीयपात्राणि, कुशनिर्मितानि पवित्रादीनि, नीतिवाक्यानि, स्वाशाखीयमहर्षीणां चित्राणि, सूक्तयः, इत्यादिसामग्रीभिरध्ययनकक्षोऽलङ्कर्तव्यः ।

(ट) **छात्रकेन्द्रितशिक्षणविधेरवलम्बनम्**

पाठ्यवस्तुनः शिक्षणक्रमे प्रवचनस्यापेक्षया समूहविमर्शन-प्रश्नोत्तरादिच्छात्रकेन्द्रित-शिक्षणविधयोऽवलम्बनीयाः । कक्षायां शिक्षकः केवलं प्रवाचको न, नैव च ज्ञाननिधिरेव अपि तु छात्रान्तर्निहितक्षमताप्रस्फोटनाय सहजकर्ता भवेत् । छात्राणां क्रियाशीलतावर्द्धकशिक्षणकार्यकलापाः सञ्चालनीयाः । विद्यार्थिसङ्ख्यानुसारेण समूहेषु छात्रान् विभज्य अन्तरक्रिया सञ्चालनीया । वैयक्तिकेन सामूहिकेन वा प्रयत्नेन विषयवस्तुषु स्वमतप्रकटनाय वादविवादसाधनाय च छात्रेभ्यः यथेच्छमवसरः प्रदातव्यः ।

(ठ) **शिक्षणसामग्रीणां वैविध्येन प्रयोगः**

यस्य कस्यापि पाठ्यवस्तुनः शिक्षणक्रमे विषयसम्बद्धशिक्षणसामग्रीणां प्रयोगो वैविध्येन करणीयः । न केवलं पाठ्यपुस्तक-श्वेतपट्ट-शब्दपत्रिकादीनामपि तु श्रव्यदृश्यादीनामाधुनिकीनां शिक्षणसामग्रीणामपि सान्दर्भिकं प्रयोगं विधाय कर्मकाण्डशिक्षणे छात्राणां साहाय्यं विधेयम् ।

कर्मकाण्डशिक्षणस्य मूलोऽभिप्रायो प्रयोगपक्षस्य शिक्षणमस्ति । शिक्षणकार्यकलापे शिक्षकशिक्षार्थिनोरन्तःक्रिया सामूहिकशिक्षणं शिक्षणमूल्याङ्कनमन्तःशिक्षकविषयिणी अन्तरक्रिया शिक्षकसमुदाययोः सहकार्यं चेत्यादयो विधयोऽवलम्बितुं शक्याः । सम्बद्धविविधसामग्रीणां संयोजनं विधाय कार्यकलापा विधातव्याः ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धे, सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशान् क्रियाकलपान् कारयित्वा सैद्धान्तिकज्ञानशिल्पयो-रवाप्तिरावश्यकी । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्नवेति विषयस्यान्वेषकं महत्त्वपूर्णं संयन्त्रं मूल्याङ्कनं भवति । विद्यार्थिनां मूल्याङ्कनं शिक्षणोपलब्धीर्ध्यात्वा सक्षमतां शिक्षणोपलब्धीनाञ्चानुरूपं शिक्षणस्य सर्वान् स्तरान् समाविश्य विधातव्यम् । आन्तरिकबाह्यमूल्याङ्कनयोर्माध्यमेन एतस्य विषयस्य मूल्याङ्कनं विधीयते । मूल्याङ्कनस्य समग्रभारतः पञ्चविंशतिप्रतिशतमान्तरिकं पञ्चसप्ततिप्रतिशतं बाह्यञ्च मूल्याङ्कनं विधीयेते । एवमेव बाह्यमूल्याङ्कनस्यान्तर्गतं लिखितपरीक्षा सञ्चाल्यते । विद्यार्थीमूल्याङ्कनस्यान्तर्गतं निर्माणात्मकं निर्णयात्मकञ्च मूल्याङ्कनं पद्धतिद्वयेनैव क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतसक्षमतानाम्, कक्षागतशिक्षणेपलब्धीनाम्, तासां विषयवस्तूनाम्, तैस्सह सम्बद्धस्य शिल्पस्य, शिक्षण सहभागितायाः शिक्षणसक्रियतायाश्चाधारेषु विद्यार्थिनां शिक्षणस्य मूल्याङ्कनं विधातव्यम् ।

अस्य स्तरस्य विद्यार्थिनां मूल्याङ्कनमक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मिका निर्णयात्मिका च प्रक्रिया अवलम्ब्यते । छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृति-कार्यै-र्निर्माणात्मकं मूल्याङ्कनं विधीयते येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-पर्यावरणसंरक्षण-भाषिकशिल्पार्जनप्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्यङ्कानां कृते आन्तरं परीक्षणम्, प्रतिशतं पञ्चसप्तत्यङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धिः क्रमशः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

**(क) आन्तरं मूल्याङ्कनम्**

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् ।

कर्मकाण्डस्य च शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन
- प्रयोगाभ्यासेन

अत्र क्रमे कक्षाध्यापकेन विधागतलेखनाय सिर्जनात्मकलेखनाय च प्रेरणम्, मन्त्रोच्चारणाय च प्रेरणम्, कुश-काष्ठ-सूत्रादिभिः प्रयोगपरकवस्तुनिर्माणं प्रदर्शनं च, प्रयोगस्थलं विचार्य विविधकर्मसम्बद्धाः रङ्गवल्लीः रचयितुम् निर्धारितविषयाणां हस्तक्रियया प्रकाशनम्, सम्बद्धमन्त्राणां श्लोकानां च शुद्धतया वाचनम्, सामूहिकी चर्चा, समूहविभाजनं कृत्वा समस्यायाः समाधानम्, निर्धारितमुहूर्तानां व्याख्यानं व्यवहारे उपयोगश्च, निर्धारितकर्मकाण्डविषयाणां परिचयप्रदानपुरःसरं औचित्याभिव्यञ्जनाय प्रेरणादिकं कार्यम् ।

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(ख) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

# विशिष्टीकरणतालिका

कक्षा :- १०　　　　　　　　　　पूर्णाङ्का: : ७५　　　　　　　　　　विषय :- कर्मकाण्डः

| क्र. सं. | विषय-क्षेत्रम् | प्रश्नस्य प्रकृतिः | ज्ञानम् | | | बोधः | | | शिल्पम् | | | उच्चदक्षता | | | समाधातव्या प्रश्न-संख्या | अंक भारः | स्पष्टीकरणम् |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | क | ख | ग | क | ख | ग | क | ख | ग | क | ख | ग | | | |
| १. | विवाहपद्धतिः | ज्ञानबोध-प्रयोगोच्च-दक्षतात्मिका | २ | - | - | २ | - | - | - | १० | - | - | - | ८ | ७ | २२ | **ज्ञानबोधक्षेत्रतः-**<br>निर्दिष्टविषयेषु द्वित्रादिशब्दैरुत्तरप्रदानात्मकौ (वस्तुनिष्ठौ) प्रश्नौ ।<br>निर्दिष्टविषयबोधात्मकौ बहुवैकल्पिकौ प्रश्नौ ।<br>**शिल्पक्षेत्रतः-**<br>निर्दिष्टशीर्षकेषु परिचयप्रदानपर एकः प्रश्नः ।<br>निर्धारितविधिनिरूपणात्मक एकः प्रश्नः ।<br>**उच्चदक्षताक्षेत्रतः-**<br>निर्दिष्टविषयेषु व्याख्यानात्मकस्तुलनात्मको वा एकः प्रश्नः । |
| २. | चतुरशीतिपूजाविधिः | ज्ञानबोध-प्रयोगात्मिका | १ | - | - | १ | - | - | - | ५ | - | - | - | - | ३ | ७ | **ज्ञानबोधक्षेत्रतः-**<br>निर्दिष्टविषयेषु टिप्पणीलेखनात्मक एकः प्रश्नः ।<br>निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः-**<br>निर्धारितविधिनिरूपणात्मक एकः प्रश्नः । |
| ३. | अन्त्यपद्धतिप्रयोगविधिः | ज्ञानबोध-प्रयोगोच्च-दक्षतात्मिका | १ | - | - | १ | - | - | - | २० | - | - | - | ८ | ७ | ३० | **ज्ञानबोधक्षेत्रतः-**<br>निर्दिष्टविषयेषु वस्तुनिष्ठः एकः प्रश्नः ।<br>निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः-**<br>निर्दिष्टविषयक्षेत्रतः परिचयप्रदानात्मकं विधिनिरूपणात्मकं समस्यासमाधानपरञ्चेति प्रश्नचतुष्टयम् ।<br>**उच्चदक्षताक्षेत्रतः-**<br>निर्दिष्टविषयेषु व्याख्यानात्मकः स्वरूपप्रकाशनात्मको वा एकः प्रश्नः । |
| ४. | पार्वणैकपार्वणातीर्थश्राद्धानि | ज्ञानबोध-प्रयोगोच्च-दक्षतात्मिका | १ | - | - | २ | - | - | - | ५ | - | - | - | ८ | ५ | १६ | **ज्ञानबोधक्षेत्रतः-**<br>पारिभाषिकार्थप्रदानात्मक एकः प्रश्नः ।<br>निर्दिष्टविषयबोधात्मकौ बहुवैकल्पिकौ प्रश्नौ ।<br>**शिल्पक्षेत्रतः-**<br>निर्दिष्टशीर्षकेषु परिचयप्रदानपरो |

| | | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | | व्यावहारिकपक्षप्रकाशनात्मको विधिनिरूपणात्मको वा एकः प्रश्नः । **उच्चदक्षताक्षेत्रतः-** निर्दिष्टविषयेषु व्याख्यानात्मकस्तुलनात्मको वा एकः प्रश्नः । |
| योगः | | | ५ | | | ६ | | | | ४० | | | | २४ | २२ | ७५ | |

**द्रष्टव्यः** क इत्यनेन अतिलघुप्रश्नो बोध्यते ।
ख इत्यनेन लघुप्रश्नो बोध्यते ।
ग इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः ।
**पुनश्च -** ज्ञानबोधक्षेत्रयोः विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेद् उच्चदक्षताक्षेत्राद् यथेच्छप्रकरणतः प्रश्नमेकं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु प्रश्नत्रयं समाधेयम् ।

# आदर्शप्रश्नपत्रम्

**विषयः - कर्मकाण्डः**

कक्षा - १० समयः - घण्टात्रयम् पूर्णाङ्काः - ७५

*(परीक्षार्थिना यथासम्भवं शुद्धं, स्पष्टं, मौलिकञ्चोत्तरं लेखनीयम्, तादृशमुत्तरं विशिष्यते ।)*

## प्रथमः खण्डः

**सङ्क्षेपेणोत्तरयत ।** **५x१=५**

१. स्वयम्वरकर्मणि कन्यया काः पूज्यन्ते ?

२. विवाहेऽष्टौ पर्वताः पूज्यन्ते, तेषां मध्ये द्वयोः नामानि कानि ?

३. चतुरशीतिपूजा कदा क्रियते ?

४. उदकदानं कदा विधीयते ? पाठ्यांशमाधृत्य लिखत ।

५. प्राचीनावीती इत्यनेन कोऽर्थो बोध्यते ?

**कोष्ठात् सर्वोपयुक्तमुत्तरमवचित्य समुत्तरयत ।** **६x१=६**

६. कः कलशभारं धारयति ? (मौनी पुरुषः, वाचालः, कन्या, परिचारिका)

७. चतुर्थीकर्मणि वधूः कतिवारं स्थालीपाकभोजनं प्राश्नाति ? (२,३,४,५)

८. चतुरशीतिपूजायां केषां पूजनं भवति ? (सिद्धानाम्, पर्वतानाम्, शिलानाम्, ऋषीणाम्)

९. सपिण्डनश्राद्धे कति पिण्डानि भवन्ति ? (त्रीणि, चत्वारि, पञ्च, षट्)

१०. मातामहादीनां तर्पणं केन तीर्थेन क्रियते ? (अग्नितीर्थेन, ब्रह्मतीर्थेन, पितृतीर्थेन, कायतीर्थेन)

११. महालयश्राद्धे कुत्र विकिरं प्रदीयते ? (आग्ने``याम्, दक्षिणस्याम्, नैर्ऋत्याम्, ऐशान्याम्)

## तृतीयः खण्डः

**केचन अष्टौ प्रश्नाः समाधेयाः ।** **८x५=४०**

१२. विवाहकर्मणो लाजाहवनप्रकारं लिखत ।

१३. अष्टपर्वतपूजनविधिर्निरूपणीयः ।

१४. वधोर्मूर्धाभिषेचनं कथं क्रियते ? समुल्लिखत ।

१५. चतुरशीतिपूजायां कानि कार्याणि सम्पाद्यन्ते ? सङ्क्षेपेण लिखत ।

१६. अस्थिसञ्चयनश्राद्धस्य परिचयो देय ।

१७. एकादशाहे सोपस्करं शय्यादानं कथं विधीयते ? प्रतिपादयत ।

१८. द्वादशाहे विधेयानि प्रमुखानि कार्याणि कानि ?

१९. पञ्चकमरणे शवदाहः कथं क्रियते ?

२०. तर्पणार्हा पितरः के ? सश्लोकं परिगणयत ।

२१. तीर्थश्राद्धे कर्तव्यानि कार्याणि समुल्लेख्यानि ।

## चतुर्थः खण्डः

**प्रश्नत्रयं समाधेयम् ।** **३x८=२४**

२२. विवाहपद्धतिमनुसृत्य कन्यादानविधिं लिखत ।

२३. वृषोत्सर्गविधिं लिखत ।

२४. सपिण्डनश्राद्धस्य हस्तार्घमेलनप्रकारो लेख्यः ।

२५. पिण्डवेदी कथं निर्मीयते ? पार्वणश्राद्धस्य पिण्डदानप्रकारश्च कः ?